मन्त्रगूढ़:, पुं, (मन्त्रे मन्त्रणाविषये गूढ़: गुप्त: ।) चर: । इति शब्दरत्नावली ॥

मन्त्रगृहं, क्ली, (मन्त्रस्य मन्त्रणाया: गृहम् ।) मन्त्रणागारम् । (यथा, महाभारते । १५ । ५ । २९ ।
"सुसंवृतं मन्त्रगृहं स्थलं चारुह्य मन्त्रयेः ।
अरण्ये नि:शलाके वा न च रात्रौ कथञ्चन ॥")

मन्त्रजा, स्त्री, (मन्त्रात् जायते इति । मन्त्र + जन् + ड: । टाप् ।) मन्त्रशक्ति: । इति पुराणम् ॥

मन्त्रजिह्व:, पुं, (मन्त्र एव जिह्वा यस्य ।) अग्नि: । इति हेमचन्द्र: । ४ । १६५ ॥ (यथा, माघ: । २ । १०७ ।
"आन्दतं नाम यत् सम्तो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥")

मन्त्रज्ञ:, पुं, (मन्त्रं जानातीति । मन्त्र + ज्ञा + क: ।) चर: । इति हलायुध: ॥ मन्त्रज्ञातरि, त्रि । (यथा, मनुसंहितायाम् । ८ । ४ ।
"व्यवहारान् दिदृक्षुस्तु ब्राह्मणै: सह पार्थिव: ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीत: प्रविशेत् सभाम् ॥")

मन्त्रणं, क्ली, (मन्त्र + ल्युट् ।) मन्त्रणा । मन्त्रधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, मार्कण्डेयपुराणे । ५० । ८१ ।
"अवस्करे मन्त्रणञ्च यच्चैतदुपलक्षय ॥")

मन्त्रणा, स्त्री, (मन्त्र + भावे युच् । टाप् ।) रहसि कर्त्तव्यावधारणम् । इति मन्त्रशब्द-टीकायां भरत: ॥ मन्त्र: । यथा,—
"वादी मूकति रङ्कति क्षितिपतिर्वैश्वानर: शीतति
क्रोधी शाम्यति दुर्जन: सुजनति क्षिप्रानुग: खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणायन्त्रित:
श्रीनित्ये वगलामुखि ! प्रतिदिनं कल्याणि तुभ्यं नम: ॥"
इति तन्त्रसारे वगलास्तोत्रम् ॥ * ॥

मन्त्रणायां वर्ज्जनीयानि यथा,—
"मन्त्रे पञ्चाङ्गताशक्तिषाड़्गुण्योपायविह्नय: ।
उदयाश्चिन्तनीयाश्च स्थैर्य्योन्नत्यादिहेतव: ॥"
इति कविकल्पलता ॥ * ॥

व्यक्तित्रयादिहतमन्त्रणायां दोषो यथा,—
"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्य्यते ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न बुध्यते ॥"
इति गारुड़े ११४ अध्याय: ॥

राज्ञा विद्यादिगुणयुक्तविप्रा मन्त्रिण: कार्य्या: । यथा,—
"मन्त्रिणस्तु नृप: कुर्य्यात् विप्रान् विद्याविशारदान् ।
विनुद्धांश्च कुलीनांश्च धर्म्मार्थकुशलानृजून् ॥
मन्त्रयेत्तै: समं काले नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
व्यस्तैश्चैव समस्तैश्च वाच्यस्य व्यपदेशत: ।
स्वयं हर्म्यं मन्त्रगृहं स्थूलं चारुह्य मन्त्रयेत् ॥
अरण्ये नि:शलाके वा न यामिन्यां कदाचन ।
शिशून् शाखामृगान् पक्षान् शुकान् वेश्यादिकांस्तथा ॥
वर्ज्जयेन्मन्त्रगेहेषु मनुष्यांश्च हतांस्तथा ।
दूषणं मन्त्रभेदेषु नृपाणां यत्र जायते ॥
न तत् सम्यक् समाधातुं शक्यं नृपशतैरपि ॥"
इति कालिकापुराणे ८५ अध्याय: ॥

अथ मन्त्रनिर्णय: ।
"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् ।
कुर्य्याद्राजा सदा मन्त्रान् कर्म्मणामाफलोदयात् ॥
अर्थानर्थौ हि यच्चोभौ संशयश्च परीक्ष्यते ।
स मन्त्र इति विज्ञेय: शेषाश्च खलु विभ्रमा: ॥
एकमेव विषं हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सम्पदं हन्ति राजानं मन्त्रविप्लव: ॥
करिष्यन् न प्रभाषेत कृतान्येव तु दर्शयेत् ।
धर्म्मार्थकामकार्य्याणि तथा मन्त्रो न भिद्यते ॥
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगत: ।
अरण्ये नि:शलाके वा तत्र मन्त्रो विधीयते ॥
तत्र नाम प्रयोक्तव्यं कार्य्येषु गुरुवत्स्वपि ।
दानं शुद्धेऽपि भेदश्च शङ्कितेष्वपि निश्चय: ॥
जड़मूकान्धबधिरान् तिर्य्यग्योनीन् वयोऽधिकान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निषेधयेत् ।
इति सम्पतत: प्रोक्ता राजनीतिरियं मया ॥
यस्त्रिवर्गाविरुद्धं स्याद्राजनीतिस्तदुच्यते ॥"
इति युक्तिकल्पतरौ नीतियुक्ति: ॥

मन्त्रत:, [स्] व्य, (मन्त्रादिति । मन्त्र + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति पञ्चमीस्थाने तसिल् ।) मन्त्रात् । इति सिद्धान्तकौमुदी ॥

मन्त्रद:, पुं, (मन्त्रं ददातीति । मन्त्र + दा + क: ।) शिष्यकर्णे तदिष्टदेवमन्त्रप्रदानकर्त्ता । मन्त्रदातृगुरु: । यथा,—
"परापरगुरूणाञ्च निर्णयं शृणु पार्व्वति ! ।
आदौ सर्व्वत्र देवेशि ! मन्त्रद: परमो गुरु: ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरु: ॥"
इति रुद्रयामलतन्त्रे २ पटल: ॥ * ॥

तत्पित्रादीनामपि परमगुरुत्वादिर्यथा,—
"मानवस्य महेशानि ! सङ्क्षेपान्निगदामि ते ।
गुरु: परमगुरुश्चैव परापरगुरुस्तथा ।
स्वगुरु: परमेशानि ! साक्षाद्ब्रह्म न संशय: ॥
तत्पिता परमगुरु: स्वयं विष्णु: क्षितौ सदा ।
तत्पिता परापरगुरुर्महेश्वरसम: सदा ॥"
इति शाक्तानन्दतरङ्गिणीधृतमहिषमर्द्दिनीतन्त्रम् ॥

मन्त्रदाता, [ऋ] त्रि, (मन्त्रं ददातीति । मन्त्र + दा + तृच् ।) मन्त्रदानकर्त्ता । गुरु: । यथा,—
"सर्व्वेषाञ्च गुरूणाञ्च जन्मदाता परो गुरु: ।
पितु: शतगुणैर्माता पूज्या वन्द्या गरीयसी ॥
विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिद: ।
पूज्यो वन्द्यश्च सेव्यश्च मातु: शतगुणैर्गुरु: ॥
मन्त्रसूत्रीरणेनैव गुरुरित्युच्यते बुधै: ।
अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरु: ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नम: ॥
अदीक्षितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम् ।
सर्व्वकर्म्मस्वनर्हस्य नरके तत्पशो: स्थिति: ॥
जन्मदातान्नदाता वा मातान्ये गुरवस्तथा ।
पारं कर्त्तुं न शक्तास्ते घोरे संसारसागरे ॥
विद्यामन्त्रज्ञानदाता निपुण: पारकर्म्मणि ।
न शक्त: शिष्यमुद्धर्त्तुमीश्वरश्चेश्वरोऽपर: ॥
गुरुर्व्विष्णुर्गुरुर्ब्रह्मा गुरुर्द्देवो महेश्वर: ।
गुरुर्धर्म्मो गुरु: शेष: सर्व्वात्मा निर्गुणो गुरु: ॥
सर्व्वतीर्थाश्रमश्चैव सर्व्वदेवाश्रयो गुरु: ।
सर्व्ववेदस्वरूपश्च गुरुरूपी हरि: स्वयम् ॥
अभीष्टदेवे रुष्टे च गुरु: शक्तो हि रक्षितुम् ।
गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम् ॥
सर्व्वे ग्रहाश्च यं रुष्टा यं रुष्टा देवब्राह्मणा: ।
तमेव रुष्टो भवति गुरुरेव हि दैवत: ॥
न गुरोश्च प्रियश्चात्मा न गुरोश्च प्रिय: सुत: ।
धनं प्रियं न च गुरोर्न च भार्य्या प्रिया तथा ॥
न गुरोश्च परो धर्म्मो न गुरोश्च परन्तप: ।
न गुरोश्च परं सत्यं न पुण्यञ्च गुरो: परम् ॥
गुरो: परो न शास्ता च नहि बन्धुर्गुरो: पर: ।
देवो राजा च शास्ता च शिष्याणाञ्च सदा गुरु: ॥
यावत् शक्तो दातुमन्नं तावत् शास्ता तदन्नद: ।
गुरु: शास्ता च शिष्याणां प्रति जन्मनि जन्मनि ॥
मन्त्रो विद्यागुरुर्द्देव: सर्व्वतन्त्रो यथा पति: ।
प्रतिजन्मनिबन्धेन सर्व्वेषामुपरि स्थिता: ॥
पिता गुरुश्च वन्द्यश्च यत्र जन्मनि जन्मद: ।
गुरवोऽन्ये तथा माता गुरुश्च प्रतिजन्मनि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे शचीसुतगुरुस्तोत्रकथनं नाम ५६ अध्याय: ॥ अपि च ।
"मान्य: पूज्यश्च सर्व्वेभ्य: सर्व्वेषां जनको भवेत् ।
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानव: ॥
जनको जन्मदाता च रक्षणाच्च पिता नृणाम् ।
ततो विस्तीर्णकरणात् कलया स प्रजापति: ॥
पितु: शतगुणैर्माता पोषणाद्गर्भधारणात् ।
वन्द्या पूज्या च मान्या च प्रसूरूपा वसुन्धरा ॥
मातु: शतगुणैर्वन्द्य: पूज्यो मान्योऽन्नदायक: ।
यद्विना नश्वरो देहो विष्णुश्च कलयान्नद: ॥
अन्नदातु: शतगुणोऽभीष्टदेव: पर: स्मृत: ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायक: ॥
अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
य: सर्व्वार्थं दर्शयति तत्पर: कोऽपि बान्धव: ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुखं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्पर: कोऽपि बान्धव: ॥
सर्व्वं जयति सर्व्वत्र विद्यया गुरुदत्तया ।
तस्मात् पूज्यो हि जगति को वा बन्धुस्ततोऽधिक: ॥
विद्यान्धो वा धनान्धो वा यो मूढ़ो न भजेद्गुरुम् ।
ब्रह्महत्यादिभि: पापै: स लिप्तो नात्र संशय: ॥